बीजं निषिक्तं ग्रीवायां विधानमनुवर्त्तत ।
ग्रीवायां पतितं बीजं सुग्रीवः समजायत ॥”
इति रामायणे उत्तरकाण्डे । १७ सर्गः ॥
अपि च ।
“वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमात्मजम् ।
सुग्रीवं जनयामास तपनस्तपतां वरः ॥”
इति रामायणे बालकाण्डे १७ सर्गः ॥
“ततः शरेणाभिहतो रामेण रणकर्कशः ।
पपात सहसा वाली निकृत्त इव पादपः ॥”
इति किष्किन्ध्याकाण्डे १७ सर्गः ॥
(वालाः केशाः सन्त्यस्य ।) वालविशिष्टे, त्रि ॥

वालीशः, पुं, मूत्रकृच्छ्ररोगः । इति शब्दरत्नावली ॥

वा(बा)लुः, स्त्री, (वलते अनेन । वल प्राणने । वल + उण् । ) एलवालुकनामकगन्धद्रव्यम् । इत्युणादिकोषः ॥

वा(बा)लुकं, क्ली, ( वालुरेव । स्वार्थे कन् । ) एलवालुकम् । इत्यमरः । २ । ४ । १२१ ॥

वा(बा)लुकः, पुं, पानीयालुः । इति राजनिर्घण्टः ॥

वा(बा)लुका, स्त्री, (वालुक + टाप् ।) रेणुविशेषः । वालि इति भाषा । तत्पर्य्यायः । सिकता २ सिक्ता ३ शीतला ४ सूक्ष्मशर्करा ५ प्रवाही ६ महासूक्ष्मा ७ सूक्ष्मा ८ पानीयवर्णिका ९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । सन्तापश्रमनाशित्वञ्च ।
“सेकप्रयोगतश्चैव शाखाशोषानिलापहा ॥”
इति राजनिर्घण्टः ॥
शाखा हस्तपादादि ॥ कर्कटी । इति जटाधरः ॥ कर्पूरः । मत्स्यविशेषः । इति शब्दचन्द्रिका ॥

वा(बा)लुकागडः, पुं, ( वालुकायाः गडतीति तस्मात् चरति यः । वालुका + गड चरणे + पचाद्यच् । वालुकाजातत्वादस्य तथात्वम् । ) मत्स्यविशेषः । वालिया इति भाषा । तत्पर्य्यायः ॥ शिताङ्गः २ । इति हारावली । १९० ॥

वा(बा)लुकात्मिका, स्त्री, ( वालुकावदात्मा स्वरूपो यस्याः । कप् अत इत्वम् । ) शर्करा । इति शब्दचन्द्रिका ॥ ( वालुका आत्मा यस्य । ) वालुकामये, त्रि ॥

वा(बा)लुकाप्रभा, स्त्री, ( वालुकाभासुरैरूणा प्रभा यस्याम् । बहुधूलिवालुकापरिणामत्वादस्य तथात्वम् । ) नरकविशेषः । इति हेमचन्द्रः । ५ । २ ॥

वा(बा)लुकामयं, त्रि, (वालुका + मयट् ।) सिकतामयम् । इति सैकतशब्दटीकायां भरतः ॥

वा(बा)लुकायन्त्रं, क्ली; ( वालुकाया यन्त्रम् । ) औषधपाकार्थयन्त्रविशेषः । यथा,—
“भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपके ।
कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते ॥
भैषज्यं कूपिकासंस्थं वह्निना यत्र पच्यते ।
वालुकायन्त्रमेतद्धि यन्त्रतत्त्वबुधैः स्मृतम् ॥”
इति भावप्रकाशः ॥

वा(बा)लुकास्वेदः, पुं, ( वालुकाभिर्विहितः स्वेदः । ) तप्तवालुकाभिस्तापनम् । यथा,—
“वातश्लेष्मणि स्वेदान् कारयेद्बहुनिर्म्मितान् ।
स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजान् ॥
खर्परभ्रष्टपटस्थितकाञ्जिकसंसिक्तवालुकास्वेदः ।
शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन् ॥
सोऽसौ माहेयं हत्वा नीत्वा पावकमाश्रयम् ।
हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति ॥”
इति भावप्रकाशः ॥

वा(बा)लुकी, स्त्री, ( वलति वालयति वा । वल प्राणने + उक । स्त्रियां ङीप् । ) कर्कटीभेदः । तत्पर्य्यायः । बहुफला २ स्निग्धफला ३ क्षेत्रकर्कटी ४ क्षेत्ररुहा ५ काण्डिका ६ मूत्रला ७ । अस्या गुणाः ।
“वालुकी वातशमनी शीता रुच्या श्रमापहा ।
पित्तास्रशमनी रुच्या कुरुते कासपीनसौ ॥
“स्याद्वालुकी शरदि वर्षजदोषकर्त्री
हेमन्तजा च खलु पित्तहरा च रुच्या ।
क्षिप्रं करोति खलु पीनसमर्द्धपक्वा
पक्वा त्वतीवमधुरा फलकारिणी च ॥”
इति राजनिर्घण्टः ॥

वा(बा)लुङ्की, स्त्री, कर्कटी । इति त्रिकाण्डशेषः ॥

वा(बा)लुङ्गिका, स्त्री, कर्कटी । इति शब्दरत्नावली ॥

वा(बा)लुङ्गी, स्त्री, कर्कटी । इति शब्दरत्नावली ॥

वा(बा)लूकः, पुं, ( वलते प्राणान् हन्ति यः । वल ड वधे + ऊक । ) विषभेदः । इति हेमचन्द्रः । ४ । २ । ३ ॥

वा(बा)लेयः, पुं, ( वलये उपकरणाय साधुः । वलि + “छदिरुपधिवलेर्ढञ् ।” ५ । १ । १३ । इति ढञ् । ) रासभः । इत्यमरः । २ । ९ । ७७ ॥ ( यथा, मार्कण्डेये । ५० । ८५ ।
“एकच्छागं द्विवालेयं त्रिगवं पञ्चमाहिषम् ।
षड्गवं सप्तमातङ्गं गृहं यत्नाच्च शोभय ॥”
वलेः सन्तानजातस्य दैत्यस्यापत्यं पुमान् । वलि + ढञ् ।) दैत्यविशेषः । इति धरणिः ॥ (वलेः विरोचनपुत्रस्य वाणज्येष्ठं पुत्रशतं जातम् ते च वालेयनाम्ना विख्याताः । यदुक्तमग्निपुराणे ।
“विरोचनस्य पुत्रस्तु वलिरेकः प्रतापवान् ।
वलेः पुत्रशतं जज्ञे राजानः सर्व्व एव ते ॥
तेषां प्रधानाश्चत्वारो विक्रान्ताः सुमहावलाः ।
सहस्रबाहुर्ज्येष्ठश्च कन्ये द्वे च वलेः शुभे ॥
वलेः पुत्रास्तु पौत्राश्च शतशोऽथ सहस्रशः ।
वालेयो नाम विख्यातो गणो विक्रान्तपौरुषः ॥”
जनमेजयवंशोद्भवस्य सुतपसो राज्ञः पुत्रो वलिस्तस्य पञ्च पुत्राश्च वालेयाः । यथा, हरिवंशे । ३१ । ३०—३३ ।
“फेनस्य सुतपा जज्ञे जज्ञे सुतपसो वलिः ।
जातो मानुषयोनौ तु स राजा काञ्चनेषुधिः ॥
महायोगी स तु वलिर्बभूव नृपतिः पुरा ।
पुत्रानुत्पादयामास पञ्च वंशकरान् भुवि ॥
अङ्गः प्रथमतो जज्ञे वङ्गः सुह्मस्तथैव च ।
पुण्ड्रः कलिङ्गश्च तथा वालेयं क्षत्रमुच्यते ॥
वालेया ब्राह्मणाश्चैव तस्य वंशकरा भुवि ।
वलेस्तु ब्रह्मणा दत्ता वराः प्रीतेन भारत ! ॥”)
अङ्गारवल्लरी । इति विश्वः ॥ चाणक्यमूलकम् । इति राजनिर्घण्टः ॥

वालेयः, त्रि, ( वालाय हितः । वाल + ढञ् । ) मृदुः । वालहितः । इति मेदिनी ॥
(वलये उपहाराय हितः । वलि + छदिरुपधिवलेर्ढञ् ।”५ । १ । १३ । इति ढञ् । तण्डुलः ॥ यथा, सिद्धान्तकौमुद्याम् ।“वालेयास्तण्डुलाः ॥”
वलियोग्यः । यथा, रघौ ।१४ । ७७ ।
“पुण्यं फलश्चार्णवमाहरन्त्यो
बीजञ्च वालेयमकृष्टरोहि ।
विनोदयिष्यन्ति नवाभिषङ्गा-
सुदारवाचो मुनिकन्यकास्त्वाम् ॥”
वितुन्नकनाम्नो वृक्षस्य त्वचि क्ली । तत्पर्य्यायो यथा,—
“कुटन्नटं दाशपुरं वालेयं परिपेलवम् ।
प्लवगोपुरगोनर्द्दकैवर्त्तीमुस्तकानि च ॥
मुस्तावत् पेलवपुटं शुक्राभं स्याद्वितुन्नकम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वालेयशाकः, पुं, ( वालेयः वलिहितः शाकः । ) ब्राह्मणयष्टिका । इत्यमरः । २ । ४ । ९० ॥

वालेष्टः, पुं, (वालानां इष्टः प्रियः ।) वदरः । इति राजनिर्घण्टः ॥ वालकाभिलषिते, त्रि ॥

वालोपवीतं, क्ली, ( वालानां वालकानां उपवीतम् । ) वालकपरिधानवस्त्रम् । तत्पर्य्यायः । पञ्चावटम् २ उरस्कटम् ३ । इति हारावली । ४८ ॥ द्विजवालकानां यज्ञसूत्रञ्च ॥

वाल्मीकिः, पुं, वल्मीकस्यापत्यम् । ( वल्मीक + इञ् । ) वल्मीकप्रभवो यस्मात् तस्माद्वाल्मीकिरित्यसौ इति ब्रह्मवैवर्त्तोक्तेः । वल्मीकप्रभवत्वेन गौणी पुत्रादिवच्छैवमस्य वल्मीकापत्यत्वं एतौत्वेव साधुरपत्यार्थः । यद्वा वल्मीक इति ऋषिविशेषस्य संज्ञेत्याहुः ॥ मुनिविशेषः । यथा,—
“तपःस्वाध्यायनिरतं तपस्वी वाग्विदाम्वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥”
इति रामायणप्रथमश्लोकः ॥
अपि च । ततस्तदनुग्रहलब्धं रामचरितं सरहस्यं निरवशेषं तत्प्रसादादेव सम्यक् विज्ञाय भूलोकवर्त्तिनां चतुर्णां वर्णानां तापत्रयविमोचनाय ब्रह्मांशभूत एव भगवान् प्राचेतसो वाल्मीकिः स्वकृतशतकोटिरामायणसारभूतं चतुर्विंशत्यक्षरगायत्र्याख्यपरब्रह्मविद्याविलासभूतं रामायणं चतुर्विंशतिसहस्रश्लोकरूपं कुशलवाभ्यामग्राहयत् । इति तट्टीका ॥ अपि च ।
“नारायणात्मकाः सर्व्वे तेषां रामोऽग्रजोऽभवत् ।
रावणान्तकरो राजा रघूणां वंशवर्द्धनः ॥
वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तमः ॥”)
इति मात्स्ये १२ अध्यायः ॥